# विभक्तिः

२५ – ०२.०७.२०१६

व्योम-संस्कृत-पाठशाला

www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पुनरावर्तनम्

- अधिकरणम् – देशः (कुत्र)
  - फलानि वृक्षे सन्ति।
  - जलं कूप्याम् अस्ति।
  - मीनाः जाले सन्ति।
- अधिकरणम् – कालः (कदा)
  - अहं प्रातःकाले स्नानं करोमि।
  - चैत्रमासे श्रीरामः जातः।
  - सः पञ्चवादने आगच्छति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# सप्तमीविभक्तिरूपाणि

| | | |
|---|---|---|
| बाले | बालयोः | बालेषु |
| बालिकायाम् | बालिकयोः | बालिकासु |
| महिलायाम् | महिलयोः | महिलासु |
| मित्रे | मित्रयोः | मित्रेषु |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १

- भुवनम् – भूखण्डाः - देशाः – राज्यानि – नगर्यः – प्रदेशाः – गृहाणि – जनाः
- ग्रामः – क्षेत्राणि – वृक्षाः – फलानि – बीजानि
- नगरम् – उद्यानानि – लताः – पुष्पाणि – मकरन्दम्
- भारतम् – नद्यः – जलम् – मीनाः
- पत्तनानि – शालाः – प्रकोष्ठाः – छात्राः
- नगरी – ग्रन्थालयाः – पुस्तकानि – चित्राणि - वर्णाः

# अभ्यासः – २ - द्विवचनवाक्यानि

- (हस्त) फलम् अस्ति।
- (पाद) व्रणः अस्ति।
- वार्ता (कर्ण) पतति।
- (नेत्र) दृष्टिः नास्ति।
- (घट) जलं पूर्णम् अस्ति।
- (गृह) जनाः न सन्ति।
- (कपाटिका) वस्त्राणि सन्ति।
- (नदी) जलं नास्ति।
- (कूपी) क्षीरं पूरय।
- (पत्रिका) वार्ताः भीकराः सन्ति।
- (शाला) छात्राः पठन्ति।
- (लेखनी) मशी नास्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ३ - बहुवचनवाक्यानि

- सिंहाः कुत्र वसन्ति?
- पक्षिणः कुत्र वसन्ति?
- मीनाः कुत्र वसन्ति?
- कृषिकाः कुत्र वसन्ति?
- फलानि कुत्र भवन्ति?
- पुष्पाणि कुत्र भवन्ति?
- छात्राः कुत्र पठन्ति?
- जनाः कुत्र वसन्ति?
- धेनवः कुत्र वसन्ति?
- कथाः कुत्र भवन्ति?
- नाटकानि कुत्र प्रदर्शितानि भवन्ति?
- जलं कुत्र भवति?

# अधिकरणम् - विषयः

- ध्रुवस्य नारायणे महती भक्तिः।
- मम व्याकरणे इच्छा अस्ति।
- श्रीकृष्णस्य पाण्डवेषु प्रीतिः आसीत्।

# अभ्यासः – ४

## बालस्य कस्मिन् आसक्तिः अस्ति?

अध्ययनम्

सङ्गीतम्

क्रीडाः

संस्कृतम्

आसक्तिः

चलच्चित्राणि

कथाः

चित्रकला

पाकः

# अभ्यासः – ५
# कस्मिन् भक्तिः?




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ६

| अर्जुनस्य | दुर्योधनस्य |
|---|---|
| श्रीकृष्णः – भक्तिः | पाण्डवाः – द्वेषः |
| युधिष्ठिरः – गौरवम् | कर्णः – स्नेहः |
| द्रौपदी – प्रीतिः | मातुलः – विश्वासः |
| सहोदराः – वात्सल्यम् | धर्मः – तिरस्कारः |
| प्रजाः – कारुण्यम् | ज्येष्ठाः – अनादरः |
| धर्मः - श्रद्धा | राज्यम् - मोहः |

# सर्वनामपदानि - सप्तमीविभक्तिः

| | | |
|---|---|---|
| तस्मिन् | तयोः | तेषु |
| तस्याम् | तयोः | तासु |
| एतस्मिन् | एतयोः | एतेषु |
| एतस्याम् | एतयोः | एतासु |
| मयि | आवयोः | अस्मासु |
| त्वयि | युवयोः | युष्मासु |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ७
# कस्मिन् प्रीतिः अस्ति?

प्रीतिः

सः

एतत्

एषा

त्वम्

अहम्

एषः

तत्

सा

# अभ्यासः - ८

- एतत् गृहम्। ________ ________ पञ्च जनाः सन्ति।
- सः पर्वतः। ________ ________ घोरं वनम् अस्ति।
- एषा नदी। ________ ________ स्नानं पुण्यप्रदं भवति।
- ताः द्रोण्यः। ________ ________ जलं पूरयः।
- एते छात्राः। ________ ________ गुरुभक्तिः अस्ति।
- वयं भारतीयाः। __________ राष्ट्रनिष्ठा भवेत्।
- यूयां मित्राणि। _________ मम प्रीतिः अस्ति।
- तौ मातापितरौ। _________ सर्वदा गौरवं भवतु।

# निर्धारणषष्ठी / सप्तमी

- धनुर्धराणां / धनुर्धरेषु रामः श्रेष्ठः।
- वेदानां / वेदेषु ऋग्वेदः प्रथमः।
- प्राणिनां / प्राणिषु गजः बृहत्तमः।
- नदीनां / नदीषु गङ्गा पवित्रा।

# अभ्यासः - ९

- (काव्यम्) नाटकं रम्यम्।
- (नाटकम्) शाकुन्तलं श्रेष्ठम्।
- (यानम्) विमानं शीघ्रम्।
- (फलम्) आम्रफलं मम प्रियम्।
- (पुष्पम्) कमलं सुन्दरम्।
- (मित्रम्) रमेशः आप्तः।
- (पर्वतः) हिमालयः अत्युन्नतः।
- (छात्रः) शङ्करः चतुरः।
- (अवतारः) मत्स्यः प्रथमः।
- (पुत्रः) माधवः कनिष्ठः।
- (पाण्डवः) भीमः बलिष्ठः।
- (राक्षसः) रावणः क्रूरः।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १०

- (भाषा) संस्कृतभाषा मधुरा।
- (तारा) अश्विनी आद्या।
- (बालिका) गिरिजा कुशला।
- (पत्रिका) सुधर्मा मम प्रिया।
- दक्षिणभारतस्य (नदी) कावेरी दीर्घा।
- (पत्नी) कैकेयी दशरथस्य प्रियतमा।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# सतिसप्तमी

- रामे राज्यं प्रशासति (सति) जनाः सर्वे सुखिनः आसन्।
- जनेषु क्रन्दत्सु (सत्सु) चोरः आभरणानि अपहृत्य निर्गतः।
- उदिते सूर्ये (सति) अन्धकारः नष्टः।
- स्वजनेषु दृष्टेषु (सत्सु) अर्जुनः विषादं प्राप्तवान्।

# सतिसप्तमी

- सत्-शब्दस्य सप्तमी विभक्तिः।
- पुंलिङ्गे/नपुंसकलिङ्गे – सति सतोः सत्सु।
- स्त्रीलिङ्गे – सत्याम् सतोः सतीषु।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ११

- रामः गतः। ______ ________ दशरथः प्राणान् त्यक्तवान्।
- पुत्री आगता। _______ ________ पितरौ बहु सन्तुष्टौ।
- काली प्रसन्ना। ______ _______ भक्तः वरम् प्राप्तवान्।
- पितरौ सुप्तौ। _______ ________ पुत्रः गृहात् बहिः गतवान्।
- कृष्णः दृष्टः। _______ ________ जनाः मुक्तिं प्राप्नुवन्ति।
- अध्यापिका आगता। _______ _______ छात्राः तूष्णीम् अभवन्।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |